ISSN- 2583-5629

# दीपशिखा

रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य संस्कृतदर्शनविभागस्य ई-पत्रिका

षष्ठः अङ्कः
(जनवरी, २०२४)



ISSN- 2583-5629

# दीपशिखा

(रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य
संस्कृतदर्शनविभागस्य षाण्मासिकी ई-पत्रिका)

षष्ठः अङ्कः
(१२ जुलाई, २०२४)

उपदेष्टा

स्वामी आत्मप्रियानन्दः

मुख्यसम्पादकः

डॉ. राकेशदाशः

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्
बेलुडमठः, हावडा, पश्चिमवङ्गः ७११२०२

प्रबन्धनसम्पादकः

स्वामी जपसिद्धानन्दः

सम्पादकमण्डली

प्रो. उन्नीकृष्णन् नम्बूतिरिः
डॉ. गोपीकृष्णन् रघुः
डॉ. नागराजभट्टः
डॉ. नीरजकुमारभार्गवः
डॉ. शन्तनुः अयाचितः
डॉ. सुखदेवभट्टः

सम्पादनसहायकः

शान्तनुनायेकः

# सूची


| क्रमः | प्रबन्धः (पठितुं शीर्षकं नुदतु) | लेखकः | पुटसङ्ख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | सम्पादकाः | १ |
| २. | विवेकानन्दप्रेषितं पत्रम् | स्वामी विवेकानन्दः | २ |
| ३. | वर्णानामर्थवत्त्वविचारः | नारायण-चन्द्रः मेट्याः | ३ |
| ४. | ध्वन्यालोकस्थं मङ्गलाचरणम् | मनीषकुमारझाः | ६ |
| ५. | पातुं न प्रथमं व्यवस्यति... इत्यादिश्लोकव्याख्या | कार्तिक-दोलुइः | ७ |
| ६. | यस्यालीयत शल्कसीम्नि... इत्यादिश्लोकव्याख्या | लक्ष्मी-नारायण-नायेकः | ८ |
| ७. | कीटानुविद्धरत्नादिसाधारण्येन... इत्यादिश्लोकव्याख्या | सायन-दासः | १० |
| ८. | स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः (अंशविशेषस्य अनुवादः) | डॉ. राकेशदाशः, शान्तनुनायेकः (अनुवादकौ) | १२ |
| ९. | स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम् (अंशविशेषस्य अनुवादः) | ब्रह्मचारी मनोमयः (अनुवादकः) | १४ |
| १०. | ब्रह्मानन्दस्वामिना सङ्कलितः श्रीश्रीरामकृष्णोपदेशः (अंशविशेषस्य अनुवादः) | ब्रह्मचारी शुभदीपः (अनुवादकः) | १६ |

# सञ्चारिणी दीपशिखा

सञ्चरति दीपशिखा। पञ्चमः अङ्कः पूज्यानां विवेकानन्दस्वामिचरणानां प्रयाणदिने, विश्वविद्यालयस्य च प्रतिष्ठादिने प्राकट्यम् आगतः इति महतः सन्तोषस्य विषयः। अस्मिन् अङ्के अष्टौ लेखाः सन्ति। एतद्विश्वविद्यालयस्य पूर्वच्छात्रः श्रीमान् तथागतमण्डलः (पि.एइच.डि.) मन्थरायाः चरित्रम् आश्रित्य सहृदयहृदयाह्लादिनं प्रबन्धं प्रस्तूय अस्माकं कार्तज्ञ्यभाग् भवति। अस्मिन् एव विश्वविद्यालये गवेषणकर्मणि निरतः श्रीमान् शैवाल आचार्यः महाकवेः भारवेः तत्कृतस्य किरातार्जुनीयमहाकाव्यस्य च सुष्ठु परिचयम् उपस्थाप्य समेषां संस्कृताध्येतॄणां महान्तम् उपकारं समपादयद् इति ऊहे। एवम् एव डॉ. सुकान्तमान्नाः नदीसंज्ञाविषये सचित्रं सप्रमाणं लेखं विलिख्य महत् उपाकरोत् व्याकरणजिज्ञासूनाम् इति प्रशस्यः सः। अपरः गवेषकः श्रीमान् राहुलमाइतिः करणसंज्ञासूत्रस्य गभीरं विश्लेषणं कृत्वा वैयाकरणानां जिज्ञासूनां पिपासां निवर्तयति इति श्लाघ्यः सः। राजद्वीपघोषः अस्मद्विश्वविद्यालयस्य समन्वितएम्.ए-कक्षायां पञ्चमवर्षे व्याकरणोपविभागे अधीयानः लघुशब्देन्दुशेखरानुसारं प्रत्याहारसूत्रं सुष्ठु विश्लेष्य स्नेहभाग् भवति अस्माकम्। विश्वविद्यालयस्य शास्त्राध्ययनाध्यापनपरम्परा ऊहितुं शक्नुवन्ति विद्वांसः अस्माद् लेखात्। पूर्ववत्, श्रीरामकृष्णलीलाप्रसङ्गस्य अनुवादाय धन्यतावचनैः भूष्यते शान्तनुनायेकः। अपि च, पूज्यैः गम्भीरानन्दस्वामिभिः विरचितस्य ब्रह्मानन्दस्वामिपादानां जीवनवृत्तस्य तथा च वन्दनीयचरणारविन्दैः ब्रह्मानन्दस्वामिपादैः सङ्कलितानां श्रीश्रीरामकृष्णोपदेशानाम् अनुवादं कृतवद्भ्यां ब्रह्मचारिभ्यां मनोमय-शुभदीपाभ्यां कृतज्ञता व्यज्यते।

प्रसङ्गेऽस्मिन् विश्वविद्यालयस्य प्रतिकुलाधिपतीनां श्रीमताम् आत्मप्रियानन्दस्वामिचरणान्, विभागाध्यक्षान् जपसिद्धानन्दस्वामिपादान् च प्रणमामः। पत्रिकायाः सम्पादने यथायथं साहाय्यम् आचरितवतां समेषां सकार्तज्ञ्यं स्मृत्वा विरमामो विस्तरात्।

मुख्यसम्पादकः

# विवेकानन्दप्रेषितं पत्रम्

## स्वामी विवेकानन्दः

[स्वामिनं शुद्धानन्दमहाराजं प्रति लिखितम् इदं पत्रम्]
ॐ तत् सत्

आलमोडा
१ जुन, १८९७

कल्याणवरेषु,

अवगमं कुशलं तत्रात्यानां वार्ताञ्च सविशेषां मठस्य तव पत्रिकायाम्। ममापि विशेषोऽस्ति शरीरस्य; सविशेषः ज्ञातव्यः भिषक्प्रवरस्य शशिभूषणस्य सकाशात्। ब्रह्मानन्देन संस्कृतया एव रीत्या चलत्वधुना शिक्षा; यदि पश्चात् परिवर्तनमर्हे तदपि कारयेत्। सर्वेषां सम्मतिं गृहीत्वा तु करणीयमिति न विस्मर्तव्यम्।

अहमधुना आलमोडानगरस्य किञ्चिदुत्तरं कस्यचिद् वणिज उपवनोपदेशे निवसामि। सम्मुखे हिमशिखराणि हिमालयस्य प्रतिफलितदिवाकरकरैः पिण्डीकृतरजतानीव भान्ति प्रीणयन्ति च। अव्याहतवायुसेवनेन मितेन भोजनेन समधिकव्यायामसेवया च सुदृढं सुदृश्यं च सञ्जातं मे शरीरम्। योगानन्दः खलु समधिकमस्वस्थ इति श्रृणोमि आमन्त्रयामि तमागन्तुमत्रैव। विभेत्यसौ पुनः पार्वत्यात् जलात् वायोश्च। 'उषित्वा कतिपयानि दिवसानि अत्रोपवने यदि न तावद् विशेषः व्याधेः गच्छ त्वं कलिकातायाम्' इत्यहमद्य तमलिखम्। यथाभिरुचि करिष्यति। अच्युतानन्दः प्रतिदिनं सायाह्ने आलमोडानगर्यां गीतादिशास्त्रपाठं जनानाहूय करोति। बहूनां नगरवासिनां स्कन्धावारस्थानां सैन्यानाञ्च समागमोऽस्ति तत्र प्रत्यहम्। सर्वानसौ प्रीणाति चेति श्रृणोमि।

'यावानर्थः' इत्यादिश्लोकस्य यो बङ्गार्थः त्वया लिखितः नासौ मन्मते समीचीनः। 'सति जले प्लाविते उदपाने नास्ति अर्थः प्रयोजनम्' इति अस्यार्थः—विषमोऽयम् उपन्यासः, किं संप्लुतोदके सति जीवानां तृष्णा विलुप्ता भवति? यद्येवं भवेत् प्राकृतिको नियमः जलप्लावितायां भूमौ जलपानं निरर्थकं—क्वचिदपि वायुमार्गेण अथवा अन्येन केनापि गूढेनोपायेन जीवानां तृष्णानिवारणं स्यात्, तदाऽसौ अपूर्वं अर्थः सार्थकः भवितुमर्हेत्। नान्यथा। शाङ्कर एवावलम्बनीयः।

इयमपि [व्याख्या] भवितुमर्हति—सर्वतः संप्लुतोदकायामपि भूमौ यावानुदपाने अर्थः तृष्णातुराणाम् (अल्पजलमलं भवेदित्यर्थः) 'आस्तां तावद् जलराशिः, मम प्रयोजनं स्वल्पेऽपि जले सिध्यति' एवं विजानतः ब्राह्मणस्य सर्वेषु वेदेषु अर्थः प्रयोजनम्। यथा संप्लुतोदके पानमात्रं प्रयोजनम् तथा सर्वेषु वेदेषु ज्ञानमात्रं प्रयोजनम्।

इयमपि व्याख्या अधिकतरा सन्निधिमापन्ना ग्रन्थकाराभिप्रेता च। उपप्लावितायामपि भूमौ पानाय उपादेयं पानाय हितं जलमेव अन्विष्यन्ति लोकाः नानात्। नानाविधानि जलानि सन्ति भिन्नगुण-धर्माणि उपप्लाविताया अपि भूमेस्तारतम्यात्। एवं विजानन् ब्राह्मणोऽपि विविधज्ञानोपप्लाविते वेदाख्ये शब्दसमुद्रे संसारतृष्णानिवारणार्थं तदेव गृह्णीयात् यदलं भवति निःश्रेयसाय। ब्रह्मज्ञानं हि तत्।

इति शं साशीर्वादं विवेकानन्दस्य

# वर्णानामर्थवत्त्वविचारः

नारायण-चन्द्रः मेट्याः

**वर्णानामर्थवत्त्वविचारः** वर्णाः अर्थवन्तः अनर्थका वा इत्यत्र विचारः क्रियते। एकवर्णेषु धातुप्रातिपदिकप्रत्ययनिपातेषु अर्थदर्शनात् वर्णाः अर्थवन्तः इति स्वीक्रियते। यथा– अध्येति, आभ्याम्, एभिः इत्यादौ एकवर्णेषु धात्वादिषु अर्थसत्त्वात्।

वर्णाः अनर्थकाः इति अपरः पक्षः। नहि प्रतिवर्णम् अर्थः उपलभ्यते, अतः वर्णाः अनर्थकाः। वर्णानाम् अनर्थकत्वे वर्णव्यत्यये अर्थाव्यत्ययात्, वर्णापाये अर्थानपायात्, वर्णोपजने अर्थानुपजनात्, वर्णविकारे अर्थाविकारात् इत्येते हेतवो दर्शिताः। तद् इदानीं विचार्यते।

**अर्थवन्तो वर्णाः**

**“अर्थवन्तो वर्णाः धातुप्रातिपदिकप्रत्ययनिपातानाम् एकवर्णानाम् अर्थदर्शनात्”**

धातुप्रातिपदिकप्रत्ययनिपातानाम् एकवर्णानाम् अर्थदर्शनात् वर्णाः अर्थवन्तः। “वर्णाः अर्थवन्तः वर्णत्वात्” इत्यनुमानाकारः। एकवर्णाः धातवः, प्रातिपदिकानि, प्रत्ययाः, निपाताः च अर्थवन्तः दृश्यन्ते, अतः वर्णानाम् अर्थवत्त्वं सिद्धं भवति। यथा– इण् गतौ, इङ् अध्ययने इत्यादयः एकवर्णाः धातवः अर्थवन्तः। एति, अधीते इत्यादि। औपगवः इत्यादौ अणादयः प्रत्ययाः अर्थवन्तः। अ अपेहि, इ इन्द्रं पश्य इत्यादौ एकवर्णविशिष्टाः निपाताः अर्थवन्तः। एतेषाम् एकवर्णानाम् अर्थवत्त्वात् अर्थवन्तः वर्णाः इति निर्णीयते।

**“वर्णव्यत्यये चार्थान्तरगमनात्”**

वर्णाः अर्थवन्तः वर्णव्यत्यये अर्थान्तरगमनात् इति अनुमानाकारः। यथा– कूपः सूपः यूपः इति। कूप इत्यत्र सककारेण सह कश्चिद् अर्थः बोध्यते, तद्वर्णाभावे तदर्थस्याबोधनात्, तद्वर्णस्य स्थाने वर्णान्तरयोजने अर्थान्तरबोधनात् च वर्णाः अर्थवन्तः इति ज्ञायते।

**“वर्णानुपलब्धौ चानर्थगतेः”**

यस्य वर्णस्य सत्त्वे यः अर्थः गम्यते, तस्य अभावे तदर्थः न बोध्यते इति वर्णाः अर्थवन्तः उति सिद्धम्। यथा– वृक्षः इत्यत्र सवकारेण पादपरूपः अर्थः गम्यते, ऋक्ष इत्यत्र वकाराभावे सः अर्थः न लभ्यते। अत्र अनर्थगतेः इत्यत्र अर्थान्तरगमनात् इति तदर्थः।

**“संघातार्थवत्त्वात्”**

वर्णाः अर्थतन्तः संघातार्थवत्त्वात् उति अनुमानाकारः। संघातस्य अर्थवत्त्वात् अर्थात् संघातस्यार्थवत्त्वे अवयवानाम् अपि अर्थवत्त्वम्। येषां पुनः अवयवाः अनर्थकाः समुदायाः अपि अनर्थकाः। यथा एकः चक्षुष्मान् दर्शने समर्थः, तत्समुदायश्च शतम् अपि समर्थम्। येषां पुनः अवयवाः अनर्थकाः तेषां यथा– एकः अन्धः दर्शने असमर्थः, तत्समुदायः च असमर्थः। एवं वर्णानाम् अर्थवत्त्वे प्रमाणं दर्शितम्। अतः वर्णानाम् अर्थवत्त्वे दोषः विचार्यते।

वर्णानाम् अर्थवत्त्वे तेषां धातुभिन्नत्वेन, प्रत्ययभिन्नत्वेन, प्रत्ययान्तभिन्नत्वेन प्रातिपदिकसंज्ञा प्राप्नोति। प्रातिपदिकत्वात् स्वादयः प्रत्ययाः उत्पद्यन्ते। सुबन्तत्वात् ‘सुतिङन्तं पदम्’ इति पदसंज्ञा प्राप्नोति।

**दोषस्य परिहारः**

**“संघातस्यैकार्थ्यात् सुबभावो वर्णात्”**

संघातस्य एकत्वम् अर्थः इति विभक्तिः समुदायाद् एव भवति। यद्यपि अवयवानाम् अपि एकत्वम्

अर्थः तथापि एकत्वम् एकम् इति एका एव विभक्तिः उत्पद्यते। सा च समुदायाद् एव। समुदायाद् उत्पद्यमानापि सर्ववर्णसम्बन्धिनी भवति इति वर्णेभ्यः विभक्त्युत्पत्तिः नास्ति।

**"वर्णा अनर्थकाः"**

अनुमानप्रमाणेन वर्णानाम् अर्थवत्त्वं संसाध्य प्रत्यक्षप्रमाणेन अनर्थकत्वसाधनपूर्वकं तद् दूषयति– "वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात्" इति। अत्र अवर्णानाम् अर्थवत्त्वाभावे (१) वर्णव्यत्यये अर्थाव्यत्ययात् (२) वर्णापाये अर्थानपायात् (३) वर्णोपजने अर्थानुपजनात् (४) वर्णविकारे अर्थाविकारात् इति चत्वारो हेतवः दर्शिताः।

**वर्णव्यत्यये उदाहरणम्** कृतेः तर्कः, हिंसेः सिंहः इति। अत्र वर्णव्यत्यये अपि अर्थव्यत्ययः नास्ति। वर्णापाये उदाहरणम्– हतः, घ्नन्ति इति। वर्णोपजने उदाहरणम्– लविता, लवितुम् इति। वर्णविकारे उदाहरणम्– घातयति, घातकः इति। अत्र वर्णविकारे अर्थविकारः नास्ति। यत्र वर्णव्यत्ययापायोपजनविकाराः भवन्ति तत्र अर्थव्यत्ययापायोपजनविकारैः भवितव्यम्। न च इह तद्वत्। अतः मन्यामहे अनर्थकाः वर्णाः इति।

**अर्थवत्त्वानर्थकत्वविचारः** अर्थवत्त्ववादिना अर्थवत्त्वसाधने धात्वादीनाम् एकवर्णानाम् अर्थदर्शनात्, वर्णव्यत्यये चार्थान्तरगमनात्, वर्णानुपलब्धौ चानर्थगतेः, संघातार्थवत्त्वात् चेति चत्वारः हेतवः दर्शिताः। वर्णानाम् अनर्थकत्वे प्रतिवर्णम् अर्थानुपलब्धेः, वर्णव्यत्यये अर्थाव्यत्ययात्, वर्णापाये अर्थानपायात्, वर्णोपजने अर्थानुपजनात्, वर्णविकारे अर्थाविकारात् इति हेतवः दर्शिता अनर्थकत्ववादिना।

**"कथं य एष भवता वर्णानाम् अर्थवत्तायां हेतुरुपदिष्टः"**

कश्चन तटस्थः वर्णानाम् अर्थवत्त्ववादिनं प्रति पृच्छति भवता वर्णानाम् अर्थवत्त्वे एकवर्णाः धातवः अर्थवन्तः इत्यादयः चत्वारः हेतवः कम् अभिप्रायम् उपलक्ष्य उपदिष्टाः। सिद्धान्ती वदति– उभयम् इति। किञ्च भवतः अर्थवत्त्ववादिनः पक्षे उभयं न्याय्यम् इति वदता सिद्धान्तिना कतिचन दोषाः प्रदर्शिताः। धातु-प्रातिपदिक-प्रत्यय-निपाता एकवर्णाः अर्थवन्तः, अतः अन्ये अनर्थकाः इति स्वाभाविकम् एतत्। तद्विषये भवान् किं वदति? तटस्थेन एवं पृष्टे अर्थवत्त्ववादी न किञ्चित् समाधत्ते।

**सिद्धान्तिनः समाधानम्** तदा उभयं न्याय्यम् इति वदन् सिद्धान्ती एवम् उत्तरम् आह–

**"संघातान्तराण्येवैतानि एवं जातीयकानि अर्थान्तरेषु वर्तन्ते"**

कूप-सूप-यूपादयः समुदायाः भिन्नजातीयकाः तत्तदर्थेषु वर्तन्ते। एवञ्च संघातभेदेन क्वचित् तदर्थावगमनं, क्वचित् तदर्थानवगतिश्च, न तु वर्णव्यत्ययादिकृतम्। किञ्च यदि वर्णव्यत्ययकृतम् अर्थान्तरगमनं न तु शब्दान्तरकृतं तर्हि कूपशब्दे वर्णचतुष्टयस्यापि कूपार्थत्वात् सूपे ककारापायेऽपि तदर्थकवर्णत्रयस्य विद्यमानत्वात् भूयिष्ठः कूपार्थः तत्र प्रतीयते। तथा नास्ति इति हेतोः अवश्यं वक्तव्यं यत् संघातान्तराणि एवञ्जातीयकानि अर्थान्तरेषु वर्तन्ते इति।

**सिद्धान्तिनः युक्त्यन्तरम्**

**"इदं खल्वपि भवता वर्णानाम् अर्थवत्तां ब्रुवता साधीयः अनर्थकत्वं द्योतितम्"**

किञ्च वर्णानाम् अर्थवत्तां ब्रुवता भवता पूर्वपक्षिणा अर्थवत्त्ववादिना सुष्ठु अनर्थकत्वं द्योतितम्। यो हि मन्यते यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति॥ ऊपशब्दः तु अस्य अनर्थकः स्याद् इति। अतः वर्णानाम् अर्थवत्त्वसाधने ये हेतुत्वेन उक्ताः अर्थवत्त्ववादिना न तेषां तत्साधने समर्थाः इति उभयं न्याय्यम् इति वदतः सिद्धान्तिनः समाधानम् इति शम्।

**प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न–** अक्षरसमाम्नाये अच्-प्रत्याहारे कथं न अनुबन्धानां ग्रहणं

भवति इति चेत्–

**आचारात्–** अर्थात् आचार्यस्य व्यवहारात् ज्ञायते यत् प्रत्याहारे अनुबन्धानां ग्रहणं न भवति। दधि णकारीयति इत्यत्र नैते आचार्याः अच्कार्यं कृतवन्तः।

**अप्रधानत्वात्–** अनुबन्धानां न अक्षु प्राधान्येनोपदेशः क्रियते। एषा ह्याचार्यस्य शैली लक्ष्यते– यत् तुल्यजातीयान् तुल्यजातीयेषु उपदिशति– अचः अक्षु हलः हल्षु इति।

**लोपश्च बलवत्तरः–** ततः लोपस्य बलवत्त्वात् अनुबन्धानां ग्रहणं न भवति।

ऊकालोऽजिति वा योगस्तत्कालानां यथा भवेत्।
अचां ग्रहणम् अच्कार्यं तेनैषां न भविष्यति॥

अथवा योगविभागः करिष्यते– "ऊकालोऽच्" उ ऊ उ३ इत्येवं कालः अज् भवति। ततः "ह्रस्वदीर्घप्लुतः" ह्रस्वदीर्घप्लुतसंज्ञश्च भवति– ऊकालोऽच्।

एवम् अपि कुक्कुट इत्यत्रापि प्राप्नोति। तस्मात् पूर्वोक्त एव परिहारः। एष एवार्थः। अपरः आह–

ह्रस्वादीनां वचनात् प्राग्यावत् तावद् एव योगः अस्तु।
अच्कार्याणि यथा स्युस्तत्कालेष्वक्षु कार्याणि॥ इति।



# ध्वन्यालोकस्थं मङ्गलाचरणम्

मनीषकुमारझाः

ग्रन्थस्य निर्विघ्नपरिसमाप्तये ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलाचरणं क्रियते। तच्च मङ्गलम् आशीर्वादात्मकं, नमस्कारात्मकं, वस्तुनिर्देशात्मकञ्च भवति इति। अत्र ध्वन्यालोके आनन्दवर्धनाचार्येण आशीर्वादात्मकं मङ्गलम् आचरितम् इति। तच्च मङ्गलम्–

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः।
त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः॥

**अन्वयः–** स्वेच्छाकेसरिणः त्रायन्तां वो मधुरिपोः स्वच्छ-स्वच्छाया-आयासित-इन्दवः प्रपन्नार्तिच्छिदो नखाः।

अत्र मूलकारिकाग्रन्थस्य रचयिता तथा वृत्तिकारः आनन्दवर्धनमहोदयः (यद्यपि) स्वयं निरन्तरं परमेश्वरनमस्कारसम्पतिचरितार्थोऽपि व्याख्यातृश्रोतॄणाम् अविघ्नेन अभीष्टव्याख्या-श्रवणलक्षणफलसम्पत्तये समुचिताशीःप्रकटनद्वारेण परमेश्वरसांमुख्यं करोति वृत्तिकारः इति।

**अर्थः–** स्वेच्छाकेसरिणः अर्थात् निजेच्छया सिंहस्य रूपधारिणः भगवतः मधुरिपोः स्वच्छस्वच्छाया-यासितेन्दवः प्रपन्नानां शरणागतानां प्रह्लादप्रभृतीनां पीडां छिन्दन्ति विनाशयन्ति ये तथाभूताः नखाः वः इत्युक्ते युष्मान् व्याख्यातृश्रोतॄन् त्रायन्ताम् अर्थात् रक्षन्तु इति।

भगवतः मधुरिपोः नारायणस्य नखाः युष्मान् व्याख्यातॄन् श्रोतॄन् च त्रायन्ताम्। सम्बोध्यस्यैव उपस्थितौ युष्मद् इति प्रयोगयोग्यत्वम्। तत्र कीदृशस्य मधुरिपोः इति जिज्ञासायाम् उच्यते– स्वेच्छया केसरिणः धृतकेसरिरूपस्य न तु कर्मपारतन्त्र्येण न वा अन्यदिच्छया। अपि तु विशिष्ट-दान-वहनौचित्यात् धृतसिंहरूपस्य विष्णोः इति। कीदृशाः नखाः इति चेत् प्रपन्नानाम् आर्तिं ये छिन्दन्ति तादृशाः नखाः। परमेश्वरेच्छया निर्मितौचित्यात् युक्तं हि नखानाम् आर्तिच्छेदकत्वम् इति। अथवा त्रिजगतः कण्टकरूपः हिरण्यकशिपुः क्लेशजनकः एव, आर्तेः मूर्तस्वरूपः इत्यतः तद्विनाशाद् हि नखानाम् आर्तिच्छेदकत्वं परमेश्वरस्य च परमकारुणिकत्वं ध्वन्यते इति। पुनश्च ते नखाः नैर्मल्यस्वच्छतादिगुणेन वक्रहृद्यरूपयाऽकृत्या चन्द्रं खेदितवन्तः। अत्र च अर्थशक्तिमूलध्वनिना चन्द्रस्य बालत्वं ध्वन्यते। ततश्च नखानां च तेषां स्वच्छतां कुटिलमानं च अवलोक्य बालचन्द्रः खेदम् अनुभवति यत् तत्तुल्योऽपि न अहं यतो हि ते नखाः तु प्रपन्नानाम् आर्तत्राणे कुशलाः अहं तु नास्मि इति। अनेन अत्र व्यतिरेकालङ्कारोऽपि ध्वन्यते। किञ्च नाहम् अधुना एकाकी असाधारणवैशद्यहृद्याकारः जनानाम् अभिलाषी अपि तु ते नखाः सन्तापहारिणः वैशद्यहृद्याकाराः एव जनानाम् इष्टाः इति विचिन्त्य चन्द्रः आयासम् अनुभवति इत्यनेन अत्र अपह्नुत्यलङ्कारः अपि ध्वनितः।

एवं वस्तु-अलङ्कार-रसभेदेन त्रिधा ध्वनिः अत्र श्लोके व्याख्यातः इति।

# पातुं न प्रथमं व्यवस्यति... इत्यादिश्लोकव्याख्या

## कार्तिक-दोलुइः

**भूमिका** अस्मिन्निति विचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयः द्वित्रा पञ्चषा वा महाकवित्वेन गण्यन्ते इति वचनात् ज्ञायते यद् जगत्यस्मिन् पञ्च महाकवयः बभूवुः। तेषु कालिदासः अन्यतमः। तस्य सप्तसु अमराकृतिषु प्रामुख्यं स्थानं भजते अभिज्ञानशाकुन्तलम् इति नाटकम्। आलङ्कारिकैः एतन्नाटकं कालिदासस्य सर्वोत्कृष्टकृतित्वेन स्वीक्रियते। नाटकेऽस्मिन् भावगम्भीराः चत्वारः श्लोकाः वर्तन्ते। तेषु आन्यतम्यं स्थानं भजते पातुं न प्रथमं व्यवस्यति.... इत्यादिश्लोकः।

**प्रसङ्गः** शकुन्तला यदा पतिगृहं गच्छति स्म, तदा कण्वः वनदेवतां प्रति एतं श्लोकं प्रोक्तवान्। शकुन्तलायाः जन्मनः परं तस्याः अरण्यम् एव आत्मीयः आसीत्। पुनः अरण्ये एव पालिता शकुन्तला। अतः तपोवनवियोगसमये महर्षिः कण्वः शकुन्तलायाः कृते आशिषपूर्वकम् आज्ञां प्रार्थितवान्।

**श्लोकः**

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥ इति।

**अन्वयः** या युष्मासु अपीतेषु प्रथमं जलं पातुं न व्यवस्यति, या प्रियमण्डना अपि भवतां स्नेहेन पल्लवं न आदत्ते, वः आद्ये कुसुमप्रसूतिसमये यस्याः उत्सवः भवति सा इयं शकुन्तला पतिगृहं याति । सर्वैः अनुज्ञायताम्॥ इति।

**अन्वयार्थः** या शकुन्तला, युष्मासु भवत्सु वृक्षेषु, न विद्यते पीतं येषां ते, तेषु अपीतेषु अपीतलेषु असिक्तेषु इति यावत्। प्रथमं पूर्वमेव जलं पानीयमेव पातुं न व्यवस्यति न यतते नेच्छति वा, किञ्च या शकुन्तला प्रियाणि मण्डनानि यस्या सा प्रियमण्डना, भूषणप्रिया अपि, भवतां स्नेहेन, अनुरागेण, युष्माकं पल्लवं नवदलं किसलयमपि, न आदत्ते न गृह्णाति, वः युष्माकं, आद्ये प्रथमे, कुसुमानां प्रसूतिः तस्याः समये कुसुमप्रसूतिसमये प्रथमकलिकास्फुटनकाले, यस्याः उत्सवः सहः परमानन्दः, भवति जायते, सा युष्मासु एवंविधवात्सल्यातिशायिनी, इयं शकुन्तला पतिगृहप्रस्थानसमये युष्मान् आमन्त्रयितुम् उपस्थिता।

सा इयं पतिगृहं भर्तृभवनं याति, सर्वैः सकलैः एषा अनुज्ञायताम् अनुमन्यताम् आज्ञाप्यताम्। अतो भवद्भिः सम्भूय पतिगृहप्रयाणानुरूपशुभाशीर्वचनवर्धितं स्नेहानुरूपं चानुमोदनं क्रियतामिति भावः।

**छन्दः** पद्यमिदं शार्दूलविक्रीडितवृत्तगुम्फितम्।

# यस्यालीयत शल्कसीम्नि... इत्यादिश्लोकव्याख्या

लक्ष्मी-नारायण-नायेकः

**भूमिका** उत्कलवासी आचार्यः विश्वनाथः साहित्यकाव्यनाट्यशास्त्रज्ञः आसीत्। कविराजः इति नाम्ना प्रसिद्धोऽयम्। अयमाचार्यः साहित्यदर्पणाख्यं ग्रन्थं रचयामास। ग्रन्थस्यास्य एकस्मिन् श्लोके विश्वनाथः अल्लाउदीनखिलजी इत्याख्यस्य राज्ञः नामस्मरणम् अकार्षीत्। एतेन नृपादस्मात् परं ग्रन्थोऽयं विरचितः इति प्रतीयते। नृपतेः कालः त्रयोदशशतकात् चतुर्दशशतकमध्ये आसीत् इति अनुमीयते। अतः विश्वनाथाचार्यस्य कालः, अपि च साहित्यदर्पणाख्यग्रन्थस्य रचनाकालः चतुर्दशशतकम् आसीत् इत्यपि अनुमीयते। साहित्यदर्पणे काव्यस्य नाट्यस्य च विवेचनं विद्यते। दशसु परिच्छेदेषु विभक्तश्चायं ग्रन्थः।

**प्रसङ्गः** श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे काव्यस्वरूपनिरूपणाख्ये प्रथमे परिच्छेदे वाक्यं रसात्मकं काव्यम् इति काव्यलक्षणे रसः इति पदेन रस-तदाभासादीनां ग्रहणं भवति। एवञ्च अत्रैव प्रत्येकस्य उदाहरणानि दर्शितानि। भावस्य उदाहरणत्वेन प्रस्तुतः अयं श्लोकः कविराजेन उदाहृतः। तथाहि–

यस्यालीयत शल्कसीम्नि जलधिः पृष्ठे जगन्मण्डलं
दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी।
क्रोधे क्षत्रगणः शरे दशमुखः पाणौ प्रलम्बासुरो
ध्याने विश्वमसावधार्मिककुलं कस्मैचिदस्मै नमः॥

**अन्वयः** यस्य शल्कसीम्नि जलधिः अलीयत, पृष्ठे जगन्मण्डलं, दंष्ट्रायां धरणी, नखे दितिसुताधीशः, पदे रोदसी, क्रोधे क्षत्रगणः, शरे दशमुखः, पाणौ प्रलम्बासुरः, ध्याने विश्वम् असौ अधार्मिककुलं कस्मैचिद् अस्मै नमः।

**अन्वयार्थः** यस्य नारायणस्य मत्स्यावतारे शरीरैकदेशे समुद्रः अयुज्यत; यस्य नारायणस्य कूर्मावतारे पृष्ठे जगन्मण्डलं लग्नम् अभवत्; यस्य वराहावतारे दशनमण्डले पृथिवी लघुवस्तुवद् अवातिष्ठत; यस्य नरसिंहावतारे करजे दैत्यपतिः हिरण्यकशिपुः लयं प्रापत्; यस्य वामनावतारे चरणे द्यावापृथिव्यौ लीने अभवताम्; यस्य परशुरामावतारे क्षत्रियगणः लयम् अगच्छत्; यस्य बलरामावतारे प्रलम्बासुरः इति एतन्नामकदैत्यस्य लयः अभवत्; यस्य बुद्धावतारे ध्याने जगद् लीनम् अगच्छत्; यस्य च भगवतः कल्किनामावतारे तरवारौ म्लेच्छसमूहः लीनम् अभवत्। इह कस्मैचिद् विशेषतः प्रदर्शयितुम् असम्भवत्वाद् अनिर्वचनीयाय अस्मै नारायणाय पुरुषाय नमः अस्तु इति शेषः।

**व्याख्या** नमस्कारात्मकेऽस्मिन् पद्ये नारायणस्तुतिः विद्यते। एतेन दशावतारवर्णनं कविना सम्यक् प्रतिपादितम्। उदाहृते अस्मिन् पद्ये भगवान् नारायणः एव विशेषः यस्याः सा तथोक्ता रतिः एव भावपदवाच्यः। अत्र भगवद्विषया रतिः सहृदयानां चेतसि कमपि चमत्कारं जनयति इति भावपदव्यपदेशस्य असौ काव्यत्वबीजम्। अत्र 'अ' इति शब्दः विष्णोः वाचकः इति अवगन्तव्यम्। इदं मध्यमकाव्यम् इति केचिद् आहुः इति शिवम्।

**छन्दः** श्लोकोऽयं शार्दूलविक्रीडितच्छन्दसा निबद्धः। च्छन्दः इदं समवृत्ते अन्तर्भवति, यत्र प्रतिपादं नवदशवर्णाः भवन्ति। शार्दूलविक्रीडितच्छन्दसः लक्षणं प्राह केदारभट्टः वृत्तरत्नाकरकारे- "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्" इति। सूर्यः इत्यनेन द्वादशसंख्या द्योत्यते। अश्वशब्दश्च



*dīpaśikhā*/v6/2024/Laxmi Narayan Nayak/pp. 8-9

सप्तसंख्याद्योतकः। अतः नवदशसु अक्षरेषु मध्ये द्वादशाक्षराद् अनन्तरं यतिः भवेत्, ततः सप्ताक्षरात् परं यतिः भवेत्। मसजस्तताः इत्यनेन मगण-सगण-जगण-सगण-तगण-तगणाः विवक्षिताः। एते च गणाः यथाक्रमं प्रयोक्तव्यम्। एतेषाम् अन्ते एकः गुरुवर्णश्च प्रयोक्तव्यः, तेनैव शार्दूलविक्रीडितच्छन्दः भवति।



[चित्रम् अन्तर्जालात् स्वीकृतम्]

# कीटानुविद्धरत्नादिसाधारण्येन... इत्यादिश्लोकव्याख्या

सायन-दासः

साहित्यदर्पणकारेण विश्वनाथकविराजेन विरचिते साहित्यदर्पणाख्ये ग्रन्थे मम्मटकृतस्य काव्यलक्षणस्य परिष्करणसमये प्रस्तुतोऽयं श्लोकः उदाहरणत्वेन उदाहृतः तथाहि–

कीटानुविद्धरत्नादिसाधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥ इति।

**अन्वयः–** दुष्टेषु अपि यत्र रसाद्यनुगमः स्फुटः (तत्र) कीटानुविद्धरत्नादिसाधारण्येन काव्यता मता इति।

**पदार्थः–** कीटेन अनुविद्धः कीटानुविद्धः। रत्नः आदौ येषां ते रत्नादयः। कीटानुविद्धाः रत्नादयः। कीटानुविद्धरत्नादिः। कीटानुविद्धरत्नादिना साधारण्यम् कीटानुविद्धरत्नादिसाधारण्यम्। रसः आदौ येषां ते रसादयः। रसादीनाम् अनुगमः रसाद्यनुगमः।

**अन्वयार्थः–** दुष्टेषु काव्येषु अपि यत्र स्फुटतया रसादीनाम् उपलब्धिः भवति, तत् काव्यम् इति मन्यन्ते काव्यतत्त्वविदः। तत्र दृष्टान्तः कीटानुविद्धरत्नादिः। यथा रत्नादयः कीटैः दष्टाः भवन्ति चेत् तेषु दोषः अस्ति इति उच्यते, नहि कीटदंशनं तस्य रत्नत्वं नाशयति। एवम् एव दोषाः काव्यस्य काव्यत्वं न नाशयन्ति। यथा दुष्टादुष्टरत्नयोः सामान्येन रत्नत्वव्यवहारः भवति, एवम् एव दोषवताम् अदोषवताम् अपि रसमयानां काव्यानां सामान्येन काव्यत्वव्यवहारः भवति।

**सामान्यार्थः–** दोषवत्सु अपि येषु वाक्येषु रस-रसाभास-भावादीनां प्रतीतिः स्पष्टा तेषु वाक्येषु बलवता दोषेण जातस्य वैरस्यस्य अतिशयम् अपि अभिभवन्ति रसादयः इति तात्पर्यम्। यथा कीटैः दष्टानां रत्नादीनां रत्नत्वव्यवहारः एव भवति, एवं दोषवताम् अपि रसमयानां वाक्यानां काव्यता स्वीकृता भवति काव्यतत्त्ववेत्तृभिः।

**व्याख्या–** मम्मटेन काव्यलक्षणे अदोषौ इति पदस्य ईषदर्थे नञः प्रयोगः इति चेत्, ईषद्दोषौ शब्दार्थौ काव्यम् इति अर्थः भवति। तथा उच्यते चेत् निर्दोषकाव्ये लक्षणस्य अव्याप्तिः। एवञ्च सति सम्भवे ईषद्दोषौ इति चेत्, एतद् अपि काव्यलक्षणे न वाच्यम्। यथा कीटानुवेधादयः रत्नस्य रत्नत्वं व्याहन्तुं न शक्नुवन्ति किन्तु उपादेयतारतम्यम् एव कर्तुं शक्नुवन्ति। तथैव काव्यस्य श्रुतिदुष्टादयः दोषाः काव्यत्वं व्याहन्तुं नैव शक्नुवन्ति। अतः रसमये वाक्ये दोषः अस्ति चेद् अपि तस्य काव्यत्वं व्याहतं न भवति।

**उदाहरणम्–** काव्यप्रकाशकारेण उत्तमध्वनिकाव्यस्य उदाहरणत्वेन किञ्चन पद्यम् उदाहृतम्।

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरः
नेत्रे दूरम् अनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुम् इतो गतासि न पुनस्तस्याधमस्यान्तिकम्॥

इदं वाक्यं सखीं प्रति सख्याः वाक्यम्। एका सखी अपरस्याः सख्याः वार्ताम् आदाय नायकस्य निकटं गता। किन्तु तत्र गत्वा सा तेन नायकेन सम्भोगं कृतवती। तस्याः शरीरे सम्भोगचिह्नानि दृष्ट्वा यदा प्रथमसखी पृष्टवती तदा वञ्चिका सखी अवदत् यत् सा वाप्यां स्नानं कृतवती। प्रथमसखी तदा पृष्टवती, "दूति, तव स्तनतटात् चन्दनं च्युतम्। अधरस्य रागः मृष्टः। नेत्रयोः अञ्जनं नास्ति। तव शरीरं पुलकितम्। हे दूति त्वं बान्धवजनस्य मम अज्ञातपीडां दृष्ट्वा अपि त्वं स्नानार्थं वापीम् एव गता, न तु

मम पीडायाः अपनयनकारिणः नायकस्य समीपं गता।” एवम् उक्त्वा सखी वञ्चिकां सखीं निन्दति।

अस्मिन् पद्ये स्तनतटात् चन्दनच्युतिः, अधरात् ओष्ठरागस्य मार्जनं, नेत्रयोः अञ्जनस्य अपगमः, शरीरस्य पुलकः च स्नानस्य अपि चिह्नानि भवितुम् अर्हन्ति, नायकेन सह सम्भोगस्य अपि इति व्यङ्ग्येन प्रथमसखी दूतीभूतां सखीं भर्त्सयति। अपि च सखि इति सम्बोधनम् अकृत्वा दूति इति सम्बोधनेन तस्याः मिथ्यावाचनशीलत्वम् अपि ध्वन्यते। एवम् इदं काव्यम् उत्तमध्वनिकाव्यस्य उदाहरणं भवति। किन्तु प्रकृतश्लोके ‘नेत्रे दूरम् अनञ्जने’ इत्यत्र दूरम् इत्यनेन सह अनञ्जने इति पदे उपसर्जनीभूतेन नञा अन्वयः कर्तव्यः भवति। अतः अत्र काव्यगतः दोषः वर्तते। किन्तु दोषस्य सत्त्वे अपि इदम् उत्तमं काव्यं भवति।



[चित्रं कृत्रिममेधाद्वारा रचितम्]

# स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः

## अनुवादकौ– डॉ. राकेशदाशः, शान्तनुनायेकः

### प्रथमः खण्डः– द्वितीयः अध्यायः (कामारपुकुरम् पितृपरिचयश्च)

### दरिद्रगृहे ईश्वरस्य अवतरणाय हेतुः

ईश्वरावताररूपेण ये महापुरुषाः अधुना जगति पूज्यन्ते, भगवन्तं श्रीरामचन्द्रं शाक्यसिंहं च विहाय तेषां सर्वेषां पार्थिवं जीवनं दुःख-दरिद्रताभ्याम् अर्थाभावेन तथा कष्टेन आरब्धम् इति दृश्यते। यथा– क्षत्रियराजकुलम् अलङ्कृतवतः अपि श्रीकृष्णस्य जन्म कारागारे अभवत्। बाल्यजीवनं च श्रीकृष्णेन आत्मीयेभ्यः स्वजनेभ्यः दूरम् अवरे गोपकुले अतिवाहितम्। श्रीभगवान् येशुक्रिस्तः पान्थशालायां पशुशालायां दरिद्रयोः पित्रोः क्रोडम् उज्ज्वलं कृतवान्। श्रीभगवान् श्रीशङ्कराचार्यः दरिद्रायाः विधवायाः पुत्ररूपेण अवततार। श्रीभगवान् श्रीकृष्णचैतन्यः नगण्यसाधारणजनस्य गृहे अजायत। इस्लाममतप्रवर्तकस्य श्रीमतः महम्मदस्य जीवनम् अपि तथैव आसीत्। तथापि दुःखदारिद्र्यसत्त्वे अपि यत्र सन्तोषस्य सरसता नास्ति, अर्थाभावे अपि यत्र निःस्वार्थता प्रेम च नास्ति, ययोः दरिद्रयोः पित्रोः हृदये त्यागः, पवित्रता तथा कठोरमानवीयगुणैः सह कोमलत्व-दया-दाक्षिण्यादीनां भावसमूहानां मधुरं सङ्गमनं नास्ति, तत्र ते कदापि जन्म न गृहीतवन्तः।

इत्थं विचार्यमाणे, पूर्वोक्तविधया सह तेषां भाविजीवनस्य कश्चन गूढः सम्बन्धः परिलक्ष्यते। यतो हि यौवने वार्धक्ये च ये समाजस्य दुःखिनां, दरिद्राणां, निपीडितानां च अश्रु प्रक्षाल्य हृदये शान्तिं नियच्छन्ति, ते तादृशानां भावेन सह पूर्वम् एव परिचिताः सहानुभूतिसम्पन्नाश्च न अभविष्यन् चेत् सर्वाणि तानि कार्याणि कथम् असाधयिष्यन्? तावद् एव न। वयम् इतः पूर्वं दृष्टवन्तः यत् संसारे धर्मग्लानिनिवारणाय एव सर्वेषाम् अवतारपुरुषाणाम् उदयः भवति। तत् कार्यं समापयितुं ते पूर्वप्रचारितानां सर्वेषां धर्मविधानानां यथार्थावस्थया सह आदौ एव परिचिताः स्युः। अपि च तेषां सर्वेषां प्राचीनविधीनां साम्प्रतिकग्लानेः कारणस्य आलोचनपूर्वकं तेषां पूर्णतासम्पादनाय साफल्यविधानाय च देशकालोपयोगि नूतनं विधानम् आविष्कर्तव्यम्। तत्परिचयलाभस्य विशेषावसरं दरिद्रस्य कुटीरम् अतिरिच्य धनिनः प्रासादः कदापि न कल्पयति। यतो हि सांसारिकसुखभोगात् वञ्चितः दरिद्रः जनः एव ईश्वरं तस्य विधानञ्च जीवनस्य प्रधानावलम्बनरूपेण सर्वदा दृढम् आलिङ्गति। अत एव सर्वत्र धर्मग्लानिः उपस्थिता चेद् अपि पूर्वपूर्वविधानानां लेशः तदापि दरिद्रस्य कुटीरम् आलोकितं करोति। किञ्च, प्रायः तस्माद् एव कारणाद् जगद्गुरवः सर्वे महापुरुषाः जन्मग्रहणकाले दरिद्रपरिवारेणैव आकृष्टाः भवन्ति।

येषां महापुरुषाणां कथां वयं वक्तुकामाः, तेषां जीवनारम्भः अपि पूर्वोक्तनियमं नातिक्राम्यति।

### श्रीरामकृष्णदेवस्य जन्मभूमिः कामारपुकुरम्

हुगलिमण्डलस्य नैर्ऋतभागे, यत्र वाँकुडामेदिनीपुरयोः द्वयोः मण्डलयोः मेलनम् अभवत्, तस्मात् सन्धिस्थलाद् अनतिदूरं त्रयः ग्रामाः त्रिकोणाकृत्या मिथः सन्निहिताः। ग्रामवासिनां कृते त्रयः ग्रामाः श्रीपुर-कामारपुकुर-मुकुन्दपुर-रूपेण भिन्नैः त्रिभिः नामभिः परिचिताः चेद् अपि तेषां तथा नैकट्यं वर्तते यत् एकस्यैव ग्रामस्य पल्लीत्रयरूपेण तेषु भ्राम्यन्ति पथिकाः। तेन कारणेन परितः सर्वेषु

ग्रामेषु ते ग्रामाः कामारपुकुर इति नाम्नैव प्रसिद्धिं गताः। तत्रत्याः सर्वे भूस्वामिनः बहुकालं यावत् तस्मिन्नेव ग्रामे वसन्ति, तस्माद् एव कारणात् प्रायः कामारपुकुरस्य पूर्वोक्तं सौभाग्यम् उदियाय। वयं यस्य कालस्य विषये कथयामः तस्मिन् काले कामारपुकुरं श्रीमतः वर्धमानमहाराजस्य गुरुवंशीयानाम् अग्रहारभूतः आसीत्। किञ्च तेषां वंशधराः श्रीयुक्ताः गोपीलाल-सुखलालप्रभृतयः गोस्वामिनः[१] तस्मिन् ग्रामे निवासम् अकुर्वन्।

कामारपुकुरात् वर्धमाननगरं प्रायः द्वात्रिंशत्-मीलमिते दूरे उत्तरस्यां दिशि वर्तते। तस्मात् नगरात् आगमनाय पक्कः मार्गः वर्तते। कामारपुकुरस्य आगमनाद् अनन्तरमेव सः मार्गः न समाप्यते, तस्य ग्रामस्य अर्धं वेष्टित्वा सः मार्गः दक्षिणपूर्वम् अभि पुरीधाम यावत् गतः। पादचारिणां, दरिद्रपथिकानां, सर्वेषां वैराग्यवतां साधूनां च बहवः तेन पथा श्रीश्रीजगन्नाथं द्रष्टुकामाः यातायातं कुर्वन्ति।

कामारपुकुरस्य पूर्वतः प्रायः नवदशेभ्यः क्रोशेभ्यः दूरं तारकेश्वरमहादेवस्य प्रसिद्धं मन्दिरं विराजते। तस्मात् स्थानात् द्वारकेश्वरनदस्य तटे जाहानावाद-आरामवागयोः मध्ये कामारपुकुरागमनाय एकः पन्थाः विद्यते। तद् विहाय प्रोक्तग्रामस्य प्रायः नवक्रोशेभ्यः दक्षिणतः घाटालग्रामात् प्रायः त्रयोदशक्रोशेभ्यः प्रतीच्यां वनविष्णुपुराद् अपि अत्र आगमनाय प्रशस्तः मार्गः वर्तते।

---

[१] स्वर्गतः हृदयराममुखोपाध्यायः अस्मान् सुखलालस्य स्थाने अनुपगोस्वामिनः नाम उक्तवान् आसीत्; परन्तु प्रायः तत् समीचीनं नास्ति। ग्रामस्य इदानीन्तनानां भूस्वामिनां लाहामहोदयानां सकाशात् अशृणवं यत्, उक्तस्य गोस्वामिमहोदयस्य नाम सुखलालः आसीत्, अपि च तत्पुत्रस्य कृष्णलालगोस्वामिनः सकाशाद् एव ते प्रायः पञ्चाशतः वर्षेभ्यः पूर्वं कामारपुकुरस्य अधिकं भूभागम् अक्रीणन् इति। पुनः ग्रामे प्रवादः वर्तते यत्, गोपेश्वरनामकस्य बृहतः शिवलिङ्गस्य प्रतिष्ठाम् अकरोत् गोपीलालगोस्वामी। अत एव गोपीलालगोस्वामी सुखलालस्य कश्चित् पूर्वपुरुषः आसीद् इति अनुमीयते। अथवा एतद् अपि भवितुम् अर्हति यत्, सुखलालस्य अपरं नाम आसीत् गोपीलालः इति।

# स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम्

## पूर्वाङ्कात् अनुवर्तते...

### ब्रह्मचारिणा मनोमयेन अनूदितम्

परन्तु दक्षिणेश्वरे एवम् अलौकिकलीलया, तत्सन्दर्शनेन च मग्नः राखालः क्रमेण अध्ययनविषये प्रणिधानहीनः अभवत् इत्येव न, तस्य संसारं प्रति वैराग्यम् अपि स्पष्टतरम् अभवत्। अनेन पिता आनन्दमोहनः अदुःख्यत्। स विषयासक्तः जनः– पुत्रम् अपि सम्पत्तिरक्षणे समर्थं द्रष्टुम् इच्छति स्म। किम् अन्ततः बालकः साधुसङ्गत्या सन्न्यासी भविष्यति वा! प्रतिकारस्य सर्वविधप्रचेष्टा यदा विफला अभवत्, तदा एकद्युः दक्षिणेश्वरात् प्रत्यागतं पुत्रं गृहे अरुणत्। बाधां प्राप्य राखालस्य मनः श्रीरामकृष्णं प्रति अधिकतरम् आकृष्टम् अभवत्, तेन सह मेलनाय च स अवसरम् अन्विषति स्म। अपरस्मिन् पक्षे श्रीरामकृष्णः अपि तस्य स्नेहभाजं पुत्रम् अदृष्ट्वा साश्रुनयनः भवतारिण्याः मन्दिरे जगन्मातुः निकटे प्रार्थितवान्– “हे मातः, राखालस्य अदर्शनेन मम हृदयं विदीर्णं भवति। मातः, मम राखालम् आनय।” जगन्माता अनया प्रार्थनया विचलिता अभवत्। एकस्मिन् अहनि पुत्रं पार्श्वे उपवेश्य आनन्दमोहनः निविष्टचित्तः सन् सम्पद्विषयकाणि पत्राणि परीक्षते स्म, इतरविषये मनः नासीत्। अस्मिन् समये राखालः पलायनस्य उत्तमम् अवसरं प्राप्य मृदुपदविक्षेपेण कक्षात्यागपूर्वकं दक्षिणेश्वरम् अगच्छत्। कतिचन दिवसान् यावत् न प्रत्यागतवान्। इतः पिता अपि वैषयिककर्मसु तथा मग्नः आसीत् यत् दक्षिणेश्वरे गमनस्य अवकाशं नालभत। न्यायालयीयव्यवहाराः जटिलः आसीत्, तत्र च जयलाभस्य आशा नासीत्। परन्तु अप्रत्याशितकारणेन आनन्दमोहनः जयं प्राप्तवान्। तदनन्तरम् अवसरं प्राप्य यदा सः पुत्रस्य अन्वेषणाय दक्षिणेश्वरम् अगच्छत्। तस्मिन् दिवसे तस्य मनः पूर्ववत् गुरुभारेण पीडितं न आसीत्, अपि च उद्वेगशून्यं प्रशान्तञ्च आसीत्। कथञ्चित् तस्य मनसि एवं भावः उत्थितः यत् अयम् अप्रत्याशितः जयः पुत्रस्य सन्न्यासिभिः सह मेलनेन अभवत् इति। विशेषतया मातृहीनस्य बालकस्य बालावस्थायां क्लेशं चिन्तयित्वा आनन्दमोहनस्य मनः किञ्चित् आतुरम् अभवत्।

दूरात् एव आनन्दमोहनम् अन्वीक्ष्य श्रीरामकृष्णः अनुमानेन अवगतवान् यत् अयं जनः राखालस्य पिता भवितुम् अर्हति। तस्मात् राखालम् आहूय उक्तवान् “अरे राखाल मन्ये तव पिता आगच्छति। पश्य।” दृष्ट्वैव भीतसन्त्रस्तः राखालः आत्मानं गोपयितुं चेष्टितवान्। परन्तु ठाकुरः आह, “भीतिः किमर्थम् । मातापितरौ प्रत्यक्षदेवतारूपौ। तव पितरि आगते सति त्वं भक्त्या प्रणामं कुर्याः। मातुः इच्छया किं किं न भवितुम् अर्हति।” सविनयः राखालरः पितुः अभिवादनं ज्ञापितवान्। श्रीरामकृष्णः अपि पितुः समीपे पुत्रस्य भूरि प्रशंसाम् अकरोत्, किञ्च आप्यायनादिना पितरं परितोषयति स्म। पुत्रं प्रति ठाकुरस्य स्नेहस्य परिचयं प्राप्य किञ्च पुत्रस्य उत्फुल्लवदनादिकं दृष्ट्वा अस्मात् स्नेहालयात् तं बलपूर्वकं विच्छेत्तुम् आनन्दमोहनस्य प्रवृत्तिः न अभवत्। राखालं दक्षिणेश्वरे एव संस्थाप्य सः गृहं प्रत्यगच्छत्। केवलं प्रार्थितवान् यथा ठाकुरः स्वेच्छानुसारं राखालं मध्ये मध्ये गृहं प्रेषयेत्। ठाकुरः तदनुसारेण राखालं गृहं प्रेषयति स्म तथापि राखालः पुनः पुनः दक्षिणेश्वरम् आगत्य निवसति स्म। तस्मात् आनन्दमोहनः अपि मध्ये मध्ये दक्षिणेश्वरं पुत्रं नेतुम् आगच्छति स्म। एवम् अवकाशम् एकं प्राप्य आनन्दमोहनं राखालं दर्शयित्वा ठाकुरः आह– “आहा आहा पश्यतु, इदानीं राखालस्य भावः कथं सुन्दरः अभवत्। मुखं पश्यति चेत् द्रष्टुं शक्नोति– अस्य ओष्ठाधरौ सर्वदा कम्पमानौ वर्तेते– अन्तः सर्वदा एव नामजपं करोति खलु तस्मात्। यद्यपि तस्य विषयिणः गेहे जन्म, जन्मनः विषयिणां सङ्गलाभः, तथापि एवं कथं जातं

तत्र विशिष्टं किञ्चित् विद्यते। शष्पबीजं यदि अवकराणां स्तूपे अपि पतति, तद्गुल्मं भवति। तेन शष्पेण बहूनि शुभकर्माणि भवन्ति। राखालः अत्र आगच्छति चेत् भवतः किम् अमतं वर्तते वा।” प्रश्नं श्रुत्वा आनन्दमोहनस्य समस्या जाता। कथं साधोः विरागभाक् भविष्यति। विशेषतः सः पर्यालोचितवान् यत् ठाकुरस्य समीपं विशिष्टाः मान्यजनाः आगच्छति। पुत्र अत्र निवसति चेत् एभिः साकं घनिष्ठसम्बन्धः भवितुम् अर्हति। एवं सर्वं चिन्तयित्वा सः उक्तवान्, “किं कथयति महोदय। राखालः तव पुत्रः एव। तव पार्श्वे एव तिष्ठतु, परन्तु मध्ये मध्ये अवसरानुसारेण मम समीपं प्रेषयतु।” एवं मध्ये मध्ये स्वगृहं गच्छति चेद् अपि राखालस्य मनसि धर्मानुष्ठानस्पृहा क्रमेण प्रवलतरा जायमाना आसीत्। एकस्मिन् दिवसे सः श्रीरामकृष्णम् अपृच्छत् यत् पितुः उच्छिष्टं उच्छिष्टपात्रे वा भोक्तुं शक्नोति न वा इति। तत्क्षणम् एव ठाकुरः उक्तवान्, “किं कथयसि त्वम्, तव किं वा जातं येन त्वं पितुः उच्छिष्टपात्रे भोक्तुं न शक्नोषि? मातापितरौ किं नगण्यं वस्तु वा! तौ यदि प्रसन्नौ न भवेतां तर्हि धर्मपालनादिकं किञ्चिद् अपि न भविष्यति। चैतन्यदेवः प्रेम्णा उन्मत्तः– तथापि सन्न्यासग्रहणात् प्राक् कथं स मातरं बोधितवान्। उक्तवान्, ‘हे मातः, मध्ये मध्ये आगत्य अहं सर्वं पर्यालोचयामि’।”

एवं वर्षद्वयम् अतीतम्। अस्मिन् पार्श्वे जामातुः वैराग्यं दृष्ट्वा प्रतिवेशिनः राखालस्य श्वश्रूमातरं श्यामासुन्दरीं सर्वदा एव सतर्कीकुर्वन्तः आसन् । तस्मात् कारणात्, स्वकन्यां रामकृष्णचरणे समर्पयितुं वा राखालस्य दक्षिणेश्वरे अवस्थानकाले एकस्मिन् दिवसे श्यामासुन्दरी विश्वेश्वर्या साकं तत्र आगतवती। किन्तु पुनः पुनः अनुरोधेन अपि राखालः दक्षिणेश्वरं त्यक्त्वा गन्तुं सम्मतः न अभवत्। तस्य दिनस्य व्यापारम् उद्दिश्य ठाकुरः अवदत्, “राखालः तदा मम स्वपित्रोः इव अत्र निवसति। ज्ञायते यत् पुनः सः आसक्तः न भविष्यति। वदति, सर्वम् अस्वादु वर्तते। तस्य सहधर्मिणी अत्र आगतवती– वयः प्रायः चतुर्दश वर्षाणि। स न गतवान्। परिणयं कृत्वा अपि राखालः आबद्धः न भविष्यति”। विषयम् इमं ठाकुरः पूर्वम् एव पुत्रवधूं परीक्ष्य ज्ञातवान्। विवाहात् परम् एकस्मिन् दिवसे एवम् एव श्यामासुन्दरी बालिकां स्वीकृत्य यदा दक्षिणेश्वरम् आगतवती तदा ठाकुरः पुत्रवधूं सरलतया स्वीकृतवान्, किन्तु मनसि झटिति प्रश्नः सञ्जातः, वध्वाः संस्पर्शेन मम राखालस्य ईश्वरभक्तेः हानिः न भविष्यति किल! तस्मात् संशयनिरसनार्थं बालिकां समीपम् आनीय स तस्याः केशराशिं शरीरलक्षणानि च परीक्ष्य अवगतवान् यत् भीतेः कारणं नास्ति– एषा दैवी शक्तिः। पत्युः धर्मानुष्ठानादिषु कदापि बाधां न जनयिष्यति। तदा हृष्टचित्तः सन् द्वारस्थितसङ्गीतशालायां निवसन्तीं मातरं[२] प्रति प्रेषितवान् किञ्च उक्तवान् यथा माता सारदादेवी रूप्यकाणि दत्वा पत्रवध्वाः मुखं पश्येत्।



[चित्रम् अन्तर्जालात् स्वीकृतम्]

[२] सारदादेवीं

# ब्रह्मानन्दस्वामिना सङ्कलितः श्रीश्रीरामकृष्णोपदेशः

## ब्रह्मचारिणा शुभदीपेन अनूदितः

### विषयः - माया

१. मायायाः स्वभावः कथं जानासि किम्? यथा जले वारिपर्णी। किञ्चित् इतस्ततः क्रियते चेत् वारिपर्णी अपसरति। परन्तु किञ्चित् परम् एव अनायासेन पूर्वस्थानम् अधिकरोति। तथा यावत् विचारं वा साधुसङ्गं वा कुर्वन्तु, न किञ्चित् चिरं तिष्ठति। किञ्चित् क्षणात् परं विषयवासना आवृणोति।

२. सर्पस्य मुखे विषं वर्तते, सः यदा स्वं भोजनं करोति तदा तस्य आहारः विषदिग्धः न भवति, परन्तु अन्यं यदा दशति, तदा विषमयं भवति। एवं भगवतः माया अस्ति चेद् अपि, तं (भगवन्तं) मोहयितुं न पारयति। किन्तु भगवान् अन्यान् मायया मोहयति।

४. यं प्रेतः आविशति सः यदि ज्ञातुं प्रभवति यत् सः प्रेताविष्टः, तर्हि प्रेतः पलायते। मायाच्छन्नः जीवः यदि सकृत् ज्ञातुं शक्नोति यत् सः मायाच्छन्नः, तदा माया तस्मात् पलायते।

५. जीवात्म-परमात्मनोः मध्ये मायायाः किञ्चन आवरणं वर्तते। मायायाः आवरणं न अपसरति चेत् परस्परं साक्षात्कारः न स्यात्। यथा अग्रे रामः, मध्ये सीता, एवञ्च पृष्ठे लक्ष्मणः अस्ति। अत्र रामः परमात्मस्वरूपः, लक्षणश्च जीवात्मस्वरूपः, मध्ये जानकी सीता मायावरणरूपेण स्थिता। यावत् माता जानकी मध्ये तिष्ठति, तावत् लक्ष्मणः रामं द्रष्टुं न पारयति। जानकी किञ्चित् अपसृता भवति चेत् तदा लक्ष्मणः रामं द्रष्टुं शक्नोति।

६. माया द्विविधा– विद्यामाया, अविद्यामाया च। एतयोः विद्यामायायाः पुनः प्रकारद्वयम्– विवेकः वैराग्यश्चेति। इयं विद्यामायां समाश्रित्य जीवः भगवतः शरणं याति। एवम् अविद्यामाया षड्विधा– कामः, क्रोधः, लोभः, मोहः, मदः, मात्सर्यम्। अविद्यामाया 'अहं', 'मम' ज्ञानेन मनुष्यान् वध्नाति। परन्तु विद्यामायायाः प्रकाशे सति जीवस्य अविद्या समूलं नश्यते।

७. यावत् जलं पङ्किलं भवति, तावत् चन्द्रसूर्ययोः प्रतिबिम्बं तस्मिन् सम्यक् द्रष्टुं न शक्यते। एवम् एव माया अर्थात् 'अहं', 'मम' च इत्यादि ज्ञानं यावत् न अपसरति, तावत् आत्मसाक्षात्कारः सम्यक् न भवति।

८. सूर्यः पृथिव्यां प्रकाशं ददाति। परन्तु लघीयान् अपि मेघखण्डः पुरतः आगत्य आवृणोति चेत्, एवं सूर्यः दृष्टिगोचरः न भवति। तथा एव सर्वव्यापिनं सर्वसाक्षिस्वरूपं सच्चिदानन्दं वयं तुच्छायाः मायायाः आवरणवशात् साक्षात्कर्तुं न पारयामः।

९. वारिपर्णी-छन्न-तडागे निमज्ज्य यदि वारिपर्णी अपसार्यते, तत्क्षणम् एव पुनः वारिपर्णी पूर्ववद् भवति। परन्तु वारिपर्णीम् अपसार्य्य यदि वंशेन बन्धनं क्रीयते, तर्हि वंशम् उल्लङ्घ्य पुनः वारिपर्णी आगन्तुं न शक्नोति। तद्वत् मायाम् अपसार्य्य ज्ञानभक्तिरूपवेष्टनी दीयते चेत् माया तन्मध्ये आगन्तुं न प्रभवति। सच्चिदानन्दः एव प्रकाशितः भवति।

१०. दक्षिणेश्वरे देवालये द्वारस्थितसङ्गीतशालायां गृहे उपरितले कश्चन साधुः कियन्तं कालम् अतिष्ठत्। सः साधुः तस्मिन् प्रकोष्ठे केनापि सह वार्तालापम् अकुर्वन्, सदा ध्यानधारणापरायणः तिष्ठति स्म। एकदा अकस्मात् मेघेन परितः अन्धकाराच्छन्नः अभवत्। केभ्यश्चित् क्षणेभ्यः परं झञ्झावातः

आगत्य मेघम् अपासारयत्। साधु तद् दृष्ट्वा प्रकोष्ठात् वहिः आगत्य सङ्गीतशालायाः अलिन्दे स्थित्वा भीषणं हासं कुर्वन् अनृत्यत्। तं तथा दृष्ट्वा ठाकुरः अपृच्छत्, 'त्वया तु प्रकोष्ठस्य मध्ये एव तुष्णीं स्थीयते, अद्य पुनः आनन्द-नर्तनं कथम्।' तदा साधुः अवदत्, 'संसारस्य माया इयमेव। प्रथमक्षणे स्वच्छः आकाशः, परन्तु झटिति मेघः आगत्य अन्धकारं करोति। एवं किञ्चित् परं यथा आसीत् तथा एव भवति।'



[बेलुडमठे श्रीश्रीरामकृष्णपरमहंसदेवस्य चित्रम्]